No. १२२२ घ

Title तर्कामृतम्

Author जगदीशः

Extent १० पत्राणि Age

Subject न्याय शास्त्रम्

तर्कामृतम्

१२२२

पत्राणि १८

त०म्रत

१

श्रीगणेशायनमः श्रीकुलदेवतायैनमः ब्रह्माद्यानिखिलार्चिताखिलदशासंदोहाः सदाभीष्ट
दाः स्वाज्ञानप्रशमाययत्रमनसो वृत्तीः समस्ताद्दधुः श्रीविश्वेश्वरणांबुजं भवभयध्वंसैकबीजं
परं हृत्सद्मे विनिधाय तन्निरूपमं तर्कामृतं तन्यते १ अथ श्रुतिः श्रूयते आत्मा वारे द्रष्टव्यः
श्रोतव्यो मंतव्यो निदिध्यासितव्य इति अस्याः अर्थः मुमुक्षुणा आत्मा द्रष्टव्यः मुमुक्षोरात्मद
र्शनमिष्टसाधनमिति यावत् आत्मदर्शनोपायः क इत्यत आह श्रोतव्य इत्यादि तेन ज्ञायते क्र
मेणशाब्दक्रमस्यसक्तो भवति अग्निहोत्रं जुहोति यवागूं पचतीत्यादिवत् तथा च श्रव
णमनननिदिध्यासनानि तत्त्वज्ञानजनकानीत्युक्तं भवति अत्र श्रुतितः कृतात्मश्रवण
स्य मननेऽधिकारः मननं चात्मन इतरभिन्नत्वेनानुमानं तच्च भेदप्रतियोगीतरज्ञानसा
ध्यं तथा चेतरएव केतदर्थं पदार्थनिरूपणं संक्षेपतः सामान्यतः पदार्थो द्विविधः भावोऽभा

एम

१

तत्र भावः षड्विधः द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात् तत्र द्रव्यत्वगुणत्वकर्मत्वा
नि जातयः सामान्यत्वादीनि उपाधयः द्रव्याणि नव पृथिव्यप्तेजोवाय्वाकाशकालदिगा
त्ममनांसि आकाशत्वकालत्वदिक्त्वान्युपाधयः अन्यानि जातयः तत्र रूपरसगंध
स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्काराश्चतुर्द
शगुणाः पृथिव्यां तत्रैव गंधं विहाय स्नेहं विनियोज्य चतुर्दशगुणा जलस्य रूपस्पर्श
संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारा एकादशगुणास्तेज
सः स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारा नव गुणा वायोः
शब्दसंख्यापरिमाणपृथक्त्वसंयोगविभागाः षड्गुणाः आकाशस्य परिमाणसंख्या
पृथक्त्वसंयोगविभागाः पंचगुणाः कालदिशोः संख्यापरिमाणपृथक्त्वसंयोगवि

तर्कदी० त भागबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्दशगुणाः आत्मनःसंख्या
परिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्काराः अष्टौमनसः ज्ञानेच्छाकृति
२ टी० संख्यादिपंचकाअष्टौगुणाईश्वरस्य तथावौ वायोर्नवैकादशतेजसोगुणाजलक्षि
तिप्राणभृतांचतुर्दश दिक्कालयोः पंचषडेवचांबरेअष्टौमनसस्तथैवच तत्र महे७
2 पृथिवीजलतेजोवायवोद्विविधाःपरमाणवःसावयवाश्च आकाशकालात्मदिशोवि
भुरूपाःमनःपरमाणुरूपं तत्रसावयवाअनित्याइतराणिनित्यानि सावयवाअपि
त्रिविधाः शरीरेंद्रियविषयभेदात् मानुषादीनांशरीरंपार्थिवंजलीयंशरीरंवरुण
[redacted]लोकेप्रसिद्धं तैजसंशरीरमादित्यलोके वायवीयंशरीरंवायुलोके घ्राणेंद्रियंपा
र्थिवं रसनेंद्रियंजलीयं चक्षुरिंद्रियंतैजसं त्वगिंद्रियंवायवीयंश्रोत्रेंद्रियंकर्ण एम
२

शष्कुल्यवच्छिन्नो नभःप्रदेशः एतानि पंच बहिरिंद्रियाणि मनोंतरिंद्रियं तेन षडिंद्रिया
णि विषयाः श्रवणादिरूपेण प्रसिद्धाः आत्मा द्विविधः जीवात्मा परमात्मा च त
त्र जीवात्मानः प्रतिशरीरं भिन्नाः बंधमोक्षयोग्याः परमात्मा ईश्वरः अथ प्रत्यक्ष
प्रत्यक्षद्रव्याणि परमाणुद्व्यणुके अप्रत्यक्षे उद्भूतरूपवत्वं पत्रतानिय थिवीजलते
जांसि प्रत्यक्षाणि आत्मा च प्रत्यक्षः वाय्वाकाशकालदिङ्मनांसि त्वप्रत्यक्षाणि
प्र८ बहिर्द्रव्यप्रत्यक्षं प्रति महत्वे सत्युद्भूतरूपं प्रयोजकं अथ द्रव्योत्पत्तिप्रक्रिया तत्रो
त्पत्तिः कारणवतां अनन्यथासिद्धनियतपूर्ववृत्तिकारणं तत्वं कारणत्वं त्रिविधानि
कारणानि समवायिकारणासमवायिकारणनिमित्तकारणानि यत्समवेतं का
र्यमुत्पद्यते तत्समवायिकारणं यथा परमाणु द्व्यणुकस्य कपालं घटस्य समवायि

त०म० कारणेसंबद्धंकारणमसमवायिकारणं यथा परमाणुद्वयसंयोगो द्व्यणुकस्य कपालद्व
यं घटरूपस्य एतदुभयभिन्नं कारणं निमित्तकारणं यथा द्व्यणुके ईश्वरो घटे दंडः ए
२ तत्कारणत्रयं भावकार्यमात्रस्य। तत्र समवायिकारणं सर्वत्र द्रव्यमेव असमवा
गुणे४ यिकारणं द्रव्ये गुणो गुणः कर्म च कार्यमात्रं प्रति साधारणकारणानीश्वरस्तज्ज्ञाने
च्छाकृतयः प्रागभावः कालदिगदृष्टानि परमाणुद्वयसंयोगाद्व्यणुकमुत्पद्यते सं
3 युक्तद्व्यणुकत्रयात्रसरेणुः एवं चतुरणुकादिकपालांतं कपालद्वयसंयोगेन घ
टो जायते घटस्तावदवयवी अथ द्रव्यप्रमाणं कथ्यते प्रत्यक्षद्रव्ये प्रत्यक्षमेव प्रमाणं
अतींद्रियेऽनुमानं तत्पक्षहेतुसाध्यदृष्टांतज्ञानसाध्यं विशेषो वक्ष्यते परमा एम
णुद्व्यणुकानुमानं यथा त्रसरेणुः सावयवद्रव्यारब्धो बहिरिंद्रियवेद्यद्रव्यत्वात् ३

बहिरिंद्रियवेद्यद्रव्यं यत्तत्सावयवद्रव्यारब्धं यथा घटः अत्र त्रसरेणुः पक्षः सा
वयवद्रव्यारब्धत्वं साध्यं बहिरिंद्रियवेद्यद्रव्यत्वादिति हेतुः घटो दृष्टांतः अनेन द्व्यणुकं
परमाणुश्च सिध्यति आकाशवायू शब्देन स्पर्शेन चानुमीयेते शब्दो द्रव्याश्रितो
गुणत्वात् यथा घटरूपं अनेन द्रव्यांतरबाधाच्छब्दाश्रयत्वेनाकाशः सिध्यति
पृथिव्यादित्रयावृत्तिरयं स्पर्शो द्रव्याश्रितो गुणत्वादित्यनुमाने द्रव्यांतरबाधात्स्प
र्शाश्रयत्वेन वायुः सिध्यति कालेप्रमाणं यथा परत्वापरत्वे द्विविधे कालिके दैशि
के चेति परत्वोत्पत्तिश्च बहुतररविक्रियाविशिष्टशरीरज्ञानात्तत्परत्वं ज्येष्ठत्वं अपर
त्वोत्पत्तिश्च स्वल्पतररविक्रियाविशिष्टशरीरज्ञानादपरत्वं कनिष्ठत्वं तदनुमानं यथा
परत्वजनकं बहुतररविक्रियाविशिष्टशरीरज्ञानमिदं परंपरासंबंधघटकसापेक्षं

न०का०
५
4

साक्षात्संबंधाभावे सति विशिष्टज्ञानत्वात् लोहितस्फटिकद्युतिप्रत्ययवत् परंपरासं
बंधश्च स्वविक्रियाया: स्वसमवायिसंयुक्तसंयोग: तेन संबंधघटक: काल: सिध्यति
ननु कालस्य भूतभविष्यद्वर्तमानभेदेन बहुत्वात् कुतस्तस्यैकत्वमिति न तस्योपाधि
भेदेन तद्भेदप्रत्ययात् कालोपाधयो विक्रियादिरूपा भिन्ना एव दैशिकपरत्वापर
त्वाभ्यां दिश: सिद्धि: तेन बहुत्वसमीपत्वे अवधिसापेक्षं बहुतरसंयोगविशिष्टज्ञा
नमिदं परत्वजनकं परंपरासंबंधघटकसापेक्षमित्यादि पूर्ववत् तेन च दिश: सिद्धि
धर नाकाशमेव संबंधघटकमास्तामिति वाच्यं तस्य शब्दाश्रयत्वेनैव धर्मिग्राहकप्रमाण
सिद्धत्वात् नरविक्रियाद्युपनायकत्वसंभव: अहं सुखी इत्यादिप्रत्यक्षमात्मनि प्रमाणं ई
श्वरानुमानं यथा क्षित्यादि: सकर्तृका कार्यत्वात् घटवत् तेनेश्वरस्य [redacted] नद्धाति नित्यज्ञानेच्छा राम ५

कृतीनांतत्सार्वज्ञस्यचसिद्धिः मनसिप्रमाणंतथाहिसुखादिप्रत्यक्षमिंद्रियजन्यंजन्यप्रत्य
क्षत्वात्घटप्रत्यक्षवत् तथाचेंद्रियांतरबाधेमनसः सिद्धिः अथद्रव्यनाशप्रक्रिया
द्रव्यनाशोद्विविधः क्वचिदसमवायिकारणनाशात् क्वचित्समवायिकारण
नाशात् तत्राद्योयथा परमाणुद्वयसंयोगनाशात् द्व्यणुकनाशः द्वितीयो
यथाकपालनाशात्घटनाशः घटनाशःउभयतःसंभवति आकाशका
लदिगात्मपरमाणवोऽन्त्यः समवायश्चपृथिव्यादिपंचानांभूतत्वं पृथिवी
जलतेजोवायुमनसांक्रियावत्वमूर्तत्वं पृथिवीजलतेजोवायवोद्रव्यसम
२वं वायिकारणानि कालस्यकालिकसंबंधेनसर्वाधिकरणत्वंयोगविभागपर
त्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दा
दिशोदैशिकसंबंधेनसर्वाधिकरणत्वं अथगुणाःकथ्यंते रूपरसगंधस्पर्शसंख्या

तर्कसं० चतुर्विंशतिर्गुणाः अथ रूपत्वादीनि सर्वाण्येव जातयः रूपं पृथिव्यादित्रयवृत्ति
१ तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात्सप्तविधं पृथिव्यां अभास्वरं
शुक्लं जले शुक्लं भास्वरं तेजसि रसः पृथिवीजलवृत्तिः तत्र मधुराम्ललवणकटुक
5 षायतिक्तभेदात्षड्विधो रसः पृथिव्यां जले मधुर एव रसः गंधो द्विविधः सुर
1 भिरसुरभिश्च पृथिवीमात्रवृत्तिः स्पर्शश्च पृथिव्यादिचतुष्टयवृत्तिः स त्रिवि
धः शीतउष्णानुष्णाशीतश्च अनुष्णाशीतस्पर्शो वायुपृथिव्योः जले शीत
स्तेजस्युष्णः संख्यापरिमाणपृथक्त्वसंयोगविभागा नवद्रव्यवृत्तयः परत्वापर
त्वे पृथिवीजलतेजोवायुमनोवृत्ती बुद्धिसुखदुःखेच्छाद्वेषकृतिभावनाधर्मा
धर्मे आत्मवृत्तयः गुरुत्वं पृथ्वीजलवृत्ति द्रवत्वं पृथिवीजलतेजोवृत्ति तत्रा राम

१

विधं नैमित्तिकं सांसिद्धिकं च आद्यं पृथिवीतेजसोः द्वितीयं जले स्नेहो जलमात्रवृत्तिः
संस्कारः पृथिवीजलतेजोवाय्वात्ममनोवृत्तिः स च त्रिविधः वेगो भावना स्थितिस्था
पकश्च तत्र वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः द्वितीय आत्मवृत्तिः तृतीयो पृ
थिव्यादिचतुष्टयवृत्तिः शब्दो द्विविधः ध्वन्यात्मको वर्णात्मकश्च आकाशमात्र
वृत्तिः रूपरसगंधस्पर्शस्नेहसांसिद्धिकद्रवत्वशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्न
धर्माधर्मभावनाविशेषगुणाः तथा चोक्तं रूपं गंधो रसः स्पर्शः स्नेहः सांसिद्धिको द्रवः
बुध्यादिभावनांतश्च शब्दो वैशेषिका गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभा
गपरत्वापरत्वगुरुत्वनैमित्तिकद्रवत्ववेगस्थितिस्थापकाः सामान्यगुणाः अप
नित्यगुणाः जलतेजोवायुपरमाणूनां विशेषगुणाः परमाणुवर्जिताः स्थितिः स्था गुरुत्व

न०मन
६
6

पकश्चविभूनांपरमाणूनांचैकत्वपरिमाणपृथक्त्वानिईश्वरेच्छाज्ञानकृतयश्चनित्यगुणाः
अथाप्रत्यक्षगुणाः गुरुत्वधर्माधर्मभावनाख्यस्थितिस्थापकाः परमाणुद्व्यणुकवृत्तिगु
णाअतीन्द्रियवृत्तिसामान्यगुणाःत्रसरेणोरूपंविहायान्येगुणाअतीन्द्रियाः रूप
सगंधस्नेहस्पर्शप्रत्यक्षेमहत्त्वंनिमित्तंसमुद्भूतत्वप्रयोजकंसामान्यगुणप्रत्यक्षे
आश्रयप्रत्यक्षं बुद्धिप्रत्यक्षेस्ववृत्तिविशिष्टज्ञानत्वं सुखादिप्रत्यक्षेस्ववृत्तिसु
खत्वादिकमेव अत्वादिशब्दोविहायसर्वेः शब्दःप्रत्यक्षः अथगुणोत्पत्तिप्रक्रिया
अवयववृत्तिविशेषगुणाः अवयविवृत्तिस्वसमानजातीयविशेषगुणानाम्
भन्ते पृथिवीविशेषगुणाः पाकजास्तेऽपिद्विविधाः पाकप्रयोज्याःपाकजन्याश्च
कारणगुणप्रक्रमजन्याःपाकप्रयोज्याः वह्निसंयोगजन्यादिनीयाः स्यामत

रम
६

रसाग्निसंयोगेन श्यामरूपनाशानंतरं घटे रक्तं रूपं उत्पद्यत इति नैयायिकमतं अ
ग्निसंयोगेन परमाणुपाके सति परमाणो रक्तरूपमुत्पद्यते पुनर्घटोत्पत्तौ सत्यां
कारणगुणप्रक्रमेण घटे रक्तं रूपमुत्पद्यत इति वैशेषिकमतं कपालं नीलमे
कमेकं पीतं पदितरा घटे चित्ररूपमुत्पद्यते रसासावेवंसत्यवपाविनिरसो न आ
पने चित्ररसाघस्वीकारात गुरुत्वस्थिति स्थायरूपोश्च कारणगुणप्रक्रम
जन्यता द्रवत्वस्पोपरीक्षानुछिन्न न्यायपरिमाणं चतुर्विधं अणुमहद्दीर्घह्रस्वं च
कारणगुणप्रक्रमजन्यं स्तावयवबहुत्वं च महत्वजनकं पपात्रसरोगेनां अ
वयवानां शिथिलः संयोगः प्रचयोभिमतः जनकः पयानूलपरिमाणं प्ययत्वे मा
कारणगुणप्रक्रमजन्यं ननु तत्र किं प्रामाण्यं घयत्यठः पयाग्गितिप्रत्यक्ष

मति ग

त र्कं॰त ६ 7 स्यान्योन्याभावविषयकत्वमिति चेन्न अन्योन्याभावप्रतीतेरनुयोगिप्रतियोगिनोः
समानविभक्तिकत्वनियमात् यथा घटो न पट इति अन्योन्याभावस्य पृथक्त्वरूपत्वे
कथं पृथक्घटो नेत्यपि प्रयोगापत्तेः नचैवं घटादन्यः पट इत्यत्र कथमन्योन्याभावप्रती
तिरिति वाच्यं अन्यत्वस्यापि पृथक्त्वरूपत्वात् संयोगस्त्रिविधः अन्यतरकर्म
जउभयकर्मजसंयोगजश्च आद्यो यथा मनः कर्मणात्ममनसोः संयोगः द्वि
तीयो यथा मेषयोः कर्मणानयोः संयोगः तृतीयो यथा कारणाकारणसंयोगात्का
र्याकार्यसंयोगः यथा हस्ततरुसंयोगात्कायतरुसंयोगः विभागस्त्रिविधः अन्य
तरकर्मजउभयकर्मजो विभागजविभागश्च आद्यो यथा मनः कर्मणाऽत्ममन
सोर्विभागः द्वितीयो यथा मेषयोः कर्मणानयोर्विभागः विभागजविभागो द्वि एम ६

विधः कारणमात्रविभागजः कारणाकारणविभागजश्च आद्यो यथा कपालकर्म
णा कपालद्वयविभागः ततः कपालद्वयसंयोगनाशः ततो घटनाशः ततः कपा
लस्याकाशादिदेशविभागः ननु विभागः स्वोत्पत्त्यनंतरमेव विभागनविभागं जनय
त्विति वाच्यं द्रव्यनाशसहकृतस्यैव तस्य तज्जनकत्वात् द्रव्यस्य प्रतिबंधकत्वेन सति
द्रव्ये तदसंभवात् न च कर्मैव एकदा कपालद्वयविभागमाकाशकपालविभागं च
जनयत्विति वाच्यं प्रद्रव्यानारंभकसंयोगविरोधिनं विभागमारभमानेन तत्द्रव्या
रंभकसंयोगविरोधिनं यथा विकसत्कुड्मलदलकर्मेति व्याप्तेः न च संयोगे
प्येवमस्तु तन्त्वाविरोधात् द्वितीयस्तु कारणाकारणविभागात् कार्याकार्यविभा
गः यथा हस्ततरुविभागात् कायतरुविभागः परत्वापरत्वेमतिः कालप्रक

त॰ म॰

२

8

छि

गोऽक्तो बुद्धिर्ज्ञानं सैविधं स्मरणमनुभवश्च स्मरणं द्विविधं यथार्थमयथार्थं च तत्
त्तिनत्प्रकारकत्वं यथार्थत्वं तदभाववति तत्प्रकारकत्वमयथार्थत्वं पूर्वानुभवः सं
स्कारद्वारा स्मरणजनकः तत्र पूर्वानुभवस्य यथार्थत्वायथार्थत्वाभ्यां स्मरणम
प्युभयरूपं भवति अनुभवो द्विविधः प्रमाऽयथार्थश्च तत्र प्रमा चतुर्विधा सा व
क्ष्यते अयथार्थज्ञानं चतुर्विधं संशयो विपर्ययः स्वप्नोऽनध्यवसायश्च संशयो य
था समानधर्मवद्धर्मिज्ञानाद्विशेषादर्शनात्कोटिद्वयस्मरणेः अयं स्थाणुर्वा पुरुषो
वेति ज्ञानं जन्यते स एव संशयः विपर्ययस्तु समानधर्मवद्धर्मिज्ञानं विशेषाद
र्शने कोटिस्मरणेः शुक्ताविदं रजतमिति ज्ञानं जन्यते तत्र गुरुमतेनेदमित्यनुभ
वात्मकं ज्ञानं रजतमिति स्मरणात्मकं तेन ग्रहणस्मरणात्मकं ज्ञानद्वयं तन्तु ज

श्रीराम

२

तत्वविशिष्टज्ञानमिदं अन्यस्यान्यथाभानसामग्र्यभावात् प्रवृत्तिश्च स्वतंत्रोपस्थि
तेष्टभेदाग्रहात् नैयायिकमते प्रवृत्तेर्वैकं विशिष्टज्ञानं तेन भ्रमः सिध्यति सामान्यता
नुभूतपदार्थस्मरणेदृष्टं न धातुदोषेण च जन्यते अन्यथाव्यवसायपश्चात् किं चिदिति शा
नं विशेषादर्शनात्संभवति अत्र पर्वतो निर्वह्निः स्यात्तर्हि निर्धूमः स्यादिति तर्को विपर्यय
मध्ये बोध्यः नवीननैयायिकमते स्वप्नानध्यवसायो विपर्ययमध्ये प्रविष्टौ तेन न त्रैभेदः
यथार्थज्ञानं द्विविधं संशयो विपर्ययश्च सुखं धर्मजन्यं दुःखमधर्मजन्यं इच्छा सा
धनताज्ञानजन्या द्वेषानिष्टसाधनताज्ञानजन्यः कृतिस्त्रिविधा जीवनयोनि
फलरूपा प्रवृत्तिनिवृत्तिश्च आद्या जीवनादृष्टजन्या द्वितीयेच्छाजन्या तृतीया द्वेष
जन्या धर्मः श्रुतिविहितकर्मजन्यः अधर्मः श्रुतिविरुद्धाचरणजन्यः वेगाख्यः सं

स्कारश्चाद्यक्रियाजन्यो द्वितीयादिक्रियाजनकः यथा वेगेन बाणश्चलति भावनाख्यः

९ संस्कारो विशिष्टज्ञानजन्यः स्मृतिस्थापकाख्यः कारणगुणप्रक्रमजन्यः गुरुत्वं का

रणगुणप्रक्रमजन्यं नैमित्तिकद्रवत्वं जतुघृतादिसुवर्णादीनामग्निसंयोगजन्यं

शदस्नेहः कारणगुणप्रक्रमजन्यः सांसिद्धिकद्रवत्वं कारणगुणप्रक्रमजन्यम् त्रि

विधः संयोगजो विभागजः शब्दजश्च आद्यो दंडभेरीसंयोगजन्यः द्वितीयो

वंशदलद्वयविभागजन्यः तृतीयस्तु संयोगेन विभागेन वा आद्यशब्देजनितैः

तैर्नूतनशब्देनभिभितवायुसहकृतेनवीचीतरंगन्यायेनवाकदंबगोलकन्यायेनजन्यते

उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानि पंचकर्माणि उत्क्षेपणादीनिजा राम

यः पृथिवीजलतेजोवायुमनोवृत्तीनिकर्माणि सर्वाण्यपनित्यानि अतींद्रियत्वी ६

४५ परस्परमत्यंताभावसमानाधिकरणयोर्धर्मयोरेकत्रसमावेशोहि संकरः॥ ५४

न्यंतीन्द्रियाणि प्रत्यक्षवृत्तीनि प्रत्यक्षाणि अथकर्मेतानि प्रक्रिया संयोगेननोदनाख्ये
नाद्यंकर्मजन्यते द्वितीयादिवेगजन्यं क्रियाक्रियातो विभागः विभागात्पूर्वदेशसंयो
गनाशः ततउत्तरदेशसंयोगोत्पत्तिः ततः कर्मविभागयोर्नाशः सामान्यंत्रिविधंव्या
पकंव्याप्यंव्याप्यव्यापकंच व्यापकंसत्ता व्याप्यंघटत्वादि द्रव्यत्वादिव्याप्यव्यापकंच
व्यक्तेरभेदस्तुल्यत्वंसंकरोथानवस्थितिः रूपहानिरसंबंधोजातिबाधकसंग्रहः
नित्यत्वेसत्यनेकसमवेतत्वमिति सामान्यलक्षणं सामान्यानि नित्यान्येव अतीन्द्रि
यवृत्तीन्यतीन्द्रियाणि प्रत्यक्षवृत्तीनि प्रत्यक्षाणि नित्यद्रव्यवृत्तयोंत्याविशेषास्ते च
बहवोनित्याः अतीन्द्रियाश्चप्रलयपरमाणूनांभेदापत्तेःस्वीक्रियंते नैषांवैधर्म्यंव्या
प्यत्वादिति स्वसंबंधिभिन्नोनित्यः संबंधः समवायः तेनस्वरूपसंबंधस्यास

10 योगस्य चानित्यम: इह घटे घटत्वमिति प्रतीतिस्तत्र प्रमाणं नैय्यायिकमते समवा
यः प्रत्यक्षः स च नित्यः नन्वन्यान्यपि अंधकारसुवर्णादीद्रव्याणि संति आलस्यादयो
गुणा अपि संति कथं नवैवेत्यादिमेवं अंधकारेण द्रव्यं किंतु तेजोभावः सुवर्णं तेजए
व आलस्यं तत्वभावः एवमन्यदपि बोध्यं अभावो द्विविधः संसर्गाभावोन्योन्या
भावश्च आद्यस्त्रिविधः प्रागभावो ध्वंसोत्यंताभावश्च प्रागभावो विनाशी अजन्यः
ध्वंसो जन्यो विनाशी अत्यंताभावान्योन्याभावावजन्यावविनाशिनौ योग्यानुपल
ब्ध्याभावः प्रत्यक्षः अन्यत्र त्वतींद्रियः अथ प्रमा कथ्यते सा चतुर्विधा प्रत्यक्षानुमि
तिउपमितिशाब्दरूपा तत्करणानि प्रमाणानि चत्वारि प्रत्यक्षानुमानोपमानश एम
ब्दभेदात् तत्र प्रत्यक्षं द्विविधं निर्विकल्पकं सविकल्पकं च प्रत्यक्षकरणानि नि १०

कर्षसहितानिप्रत्यक्षंतनयंति संन्निकर्षो लौकिकोलौकिकश्च अलौकिकस्त्रिविधः

ज्ञानलक्षणासामान्यलक्षणायोगजधर्मश्च लौकिकःषड्विधः संयोगः १ संयुक्तस

मवायः २ संयुक्तसमवेतसमवायः ३ समवायः ४ समवेतसमवायः ५ विशे

षणताचेतिषडिंद्रियाणि घ्राणरसनचक्षुस्त्वक्श्रोत्रमनांसि एतानिसंनि योगे

नद्रव्यग्रहः संयुक्तसमवायेनशब्दान्यगुणकर्मद्रव्यवृत्तिजातीनांप्रत्यक्षं संयुक्तसम

वेतसमवायेनशब्दमात्रवृत्तिजातीतरगुणवृत्तिजाति कर्मवृत्तिजातीनांप्रत्यक्षंस

मवायेनशब्दस्यसमवेतसमवायेनशब्दवृत्तिजातीनांप्रत्यक्षं विशेषणतयाऽभाव

स्यसमवायस्यच अलौकिकःसयथा ज्ञानलक्षणयासुरभिचंदनमिति चाक्षुषंज्ञानं

सामान्यलक्षणयाघटत्वेनरूपेणयावत्घटज्ञानंयोगजधर्मेणयोगिनांसर्वज्ञानं

॥ न्नानिर्विकल्पकं विशिष्यप्रकारादिरहितं वस्तुस्वरूपमात्रज्ञानं सविकल्पकं सप्रका
रकं भासमानवैशिष्ट्यप्रतियोगित्वं प्रकारत्वं यथायं घट इत्यत्रायं विशेष्यः घटत्वं
प्रकारः भासमानवैशिष्ट्यमेतयोः समवायः तत्प्रतियोगिघटत्वं सविकल्पकमेव
विशिष्टवैशिष्ट्यज्ञानं यथाऽयं दण्डी अत्र दण्डत्वविशिष्टस्य वैशिष्ट्यं पुरुषे भासते अथ
प्रक्रिया आदाविन्द्रियसन्निकर्षाद् घटघटत्वे इति निर्विकल्पकं ततोयं घट इति विशिष्ट
ज्ञानं तत्र परतः प्रामाण्यग्रह इति नैयायिकाः यथाऽयं घट इति व्यवसायः ततो घटं जाना
मीत्यनुव्यवसायः ततः प्रामाण्याप्रामाण्ये इति कोटिद्वयस्मरणं अयं वस्तुत इदं ज्ञानं
प्रमा न वेति प्रामाण्यसंशयः ततो विशेषदर्शनानन्तरं प्रामाण्यग्रहः इदं ज्ञानं प्रमा स
मर्थप्रवृत्तिजनकत्वात् ज्ञानानां स्वतः स्वतः प्रामाण्यग्रह इति त्रयो मीमांसकाः तत्र गुरु एम

१२

मतेऽयंघटइतिज्ञानंविषयंआत्मानंज्ञानप्रामाण्यंचगृह्णातिमुरारिमिश्रमतेऽयंघटइ
तिज्ञानानंतरंघटमहंजानामीत्यनुव्यवसायः तेनैवप्रामाण्यग्रहः भट्टमतेज्ञानस्यातीं
द्रियत्वेनज्ञानमनुमेयंप्रथानयाततत्वतिप्रामाण्यं यथा अयं घटइतिज्ञानानंतरं
घटेज्ञातताउत्पद्यते ततोज्ञातोमयाघटइतिज्ञाततायाःप्रत्यक्षं ततोव्याप्यादिमत्साक्षा
न्तरंज्ञानानुमानं यथाहंघटत्वप्रकारकज्ञानवान् घटत्वप्रकारकज्ञाततावत्वात् त
त्वेनैवतत्स्यधर्मधर्मिविषयकत्वेनप्रामाण्यंचानुमानं अनुमितिकरणमनुमानं अनु
मितित्वंजातिः व्यापारवत्कारणंकरणं व्यापारश्चतज्जन्यत्वेसतितज्जन्यजनकः हे
तुज्ञानादिकारणंपरामर्शोव्यापारः परामर्शश्चव्याप्तिविशिष्टपक्षधर्मताज्ञानं यथा
वह्निव्याप्यधूमवानयमितिआदौमहानसादौधूमवह्निसामानाधिकरण्यग्रहेसति

४५ वह्नौ धूमसामानाधिकरणवह्निभेदप्रतियोगित्वादव्याप्तिवारणाय सतीति॥ न च धूमसमानाधिकरणघटत्वंताभावान
ष्ठ तदात्मकवह्निभेदप्रतियोगित्वात्तथैवाव्याप्तिरिति वाच्यं॥ प्रतियोगितायां हेत्वधिकरणवृत्तितावच्छेदकात्यंता
भावत्वं निरूप्यकत्वपर्यवसितविवक्षणात्॥ अत एव धूमसमानाधिकरणघटात्यंताभावात्मकवह्न्यन्यत्यंताभावप्रति
योगित्वेऽपि वह्नौ नाव्याप्तिः॥

12

धूमो वह्निव्याप्य इत्यनुभवो जायते ततः कालांतरे पर्वते धूमे दृष्टे सति व्याप्तिस्मरणं
तत्र वह्निविशिष्टवैशिष्ट्यज्ञानं वह्निव्याप्यधूमवानयमिति तत्सा लिंगपरामर्शः पक्ष
तासहितेन तेन पर्वतो वह्निमानित्यनुमितिर्जन्यते व्याप्तिश्च हेतुसमानाधिकरणा
त्यंताभावाप्रतियोगिसाध्यसामानाधिकरण्यं न च संयोगवान् द्रव्यत्वादित्यत्राव्याप्तिः
प्रतियोगिव्यधिकरणहेतुसमानाधिकरणात्यंताभावाप्रतियोगिसाध्यसामानाधिक
रण्यमित्यर्थस्य ज्ञातत्वाच्चाव्याप्तिसाधनापि विरहात् सहकृतसिद्ध्यभावानुमानं द्विविधं
स्वार्थं परार्थं च तत्र परार्थं पंचावयवसाध्यं अवयवाश्च प्रतिज्ञाहेतूदाहरणोप
नयनिगमनानि यथात्र पर्वतो वह्निमान् धूमात् यत्र धूमस्तत्राग्नि यथा महानसः
वह्निव्याप्यधूमवानयं तस्माद्वह्निमान् स्वार्थं च स्वीयमात्रस्यादि नगरे साध्यं तत्र

एम

१२

परप्रतिपत्यर्थमेनमाहुस्सएवप्रयोगं तच्चानुमानंत्रिविधंकेवलान्वयिकेवलव्यतिरेक्यन्व
यव्यतिरेकिभेदात् यत्रसाध्यस्यव्यतिरेकोनकुत्राप्यस्तिसकेवलान्वयी यथाघटोभि
धेयःप्रमेयत्वादित्यत्राभिधेयत्वस्यसाध्यस्यव्यतिरेकोनकुत्रापि यत्रसाध्यप्रसिद्धि
पक्षातिरिक्तेनास्तिसकेवलव्यतिरेकी यथापृथिवीतरेभ्योभिद्यतेपृथिवीत्वात्
यत्रेतरभेदाभावः तत्रपृथिवीत्वाभावःयथाजलादि व्यतिरेकव्याप्तौनुसाध्याभावोव्या
प्यः हेत्वभावोव्यापकः यत्रसाध्यंसाध्याभावश्चान्यत्रप्रसिद्धःसोन्वयव्यतिरेकी यथा
पर्वतोवह्निमान् धूमादित्यत्रअन्वयव्यतिरेकिणिहेतोअवश्यंपंचरूपोपपन्नतापेक्षणी
या पक्षसत्त्वंसपक्षसत्त्वंविपक्षव्यावृत्तत्वंअबाधितत्वं असत्प्रतिपक्षत्वंचेतिपंचरूपा
णि केवलान्वयिनिविपक्षव्यावृत्तत्वरहितकेवलव्यतिरेकिणिसपक्षसत्वरहित

वस्तुरूप[redacted]मेवापेक्षितं पक्षसाध्यसंदेहः सपक्षः पक्षसाध्यनिश्चयः सपक्षः पक्ष
साध्याभावनिश्चयः स विपक्षः साध्याभाववान्पक्षो बाधः साध्यविरोधिसाधको हेतुः
सो॰ ३ सत्प्रतिपक्षः [redacted]पाधौ पक्षसपक्षसत्त्वान्यत[redacted]भंग आवश्यकः सोपाधिरुपाधिर्द्वि
धः साधनाव्यापकत्वे सति शुद्धसाध्यव्यापकः साधनाव्यापकत्वे सति पक्षधर्मावच्छि
13 न्नसाध्यव्यापकः साधनाव्यापकत्वे सति साधनावच्छिन्नसाध्यव्यापकश्च आद्योपधा अयो क
गोलकं धूमवद्वह्नेरित्यत्रार्द्रेन्धनप्रभववह्निमत्त्वमुपाधिः साधनाव्यापकत्वे सति शुद्ध
साध्यव्यापकं द्वितीयोपधा वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् अत्र बहिर्द्रव्यत्वाव
च्छिन्नपक्षत्वस्य साध्यस्य व्यापकमुद्भूतरूपवत्त्वमुपाधिः तृतीयोपधा ध्वंसो विना एम
शिजन्यत्वात् अत्र जन्यत्वावच्छिन्नं विनाशित्वव्यापकं भावत्वमुपाधिः अपहेत्वाभा

x७ आ व्यभिचारितासंबन्धोपाधिर्ये

साः कथ्यंते सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पंचहेत्वाभासाः [redacted] सव्यभि
चारः त्रिविधः साधारणासाधारणानुपसंहारिभेदात् साध्याभावनाभाववद्वृत्तित्वं स
धारणत्वं यथा धूमवद्वन्हेः सकलसपक्षव्यावृत्तत्वमसाधारणत्वं यथा पर्वतो वन्हिमान्
र्वतत्वात् सर्वपक्षकत्वमनुपसंहारित्वं यथा सर्वं प्रमेयमभिधेयत्वात् साध्याभावव्या
प्तो हेतुर्विरुद्धः यथा घटो नित्यः सावयवत्वात् सत्प्रतिपक्षो यथा पर्वतो वन्हिमान् धू
मात् पर्वतो वन्[redacted]भाववान् महानस[redacted]त्वात् असिद्धस्त्रिविधः आश्रयासिद्धः स्व
रूपासिद्धो व्याप्यत्वासिद्धश्च यत्र पक्षो सन् सिद्धसाधानं वा स आश्रयासिद्धः यथा
शशविषाणं निम्नमजन्यत्वात् शरीरं हस्तादिमद्धस्तादिमन्नयापतीयमानत्वात् पक्ष
पक्षावृत्तिर्हेतुः सस्वरूपासिद्धः यथा पर्वतो वन्हिमान् महानसत्वात् सद्विशेषण

सिद्धविशेष्यासिद्धभागासिद्धभेदाद्धेतुर्विधः आद्यो यथा शब्दो नित्यः चाक्षुषत्वे सति ज
न्यत्वात् द्वितीयो यथा शब्दो अनित्यः गुणत्वे सति परमाणुवृत्तित्वात् तृतीयो यथा
14 एतानि द्रव्याणि निरवयवत्वात् सोपाधिर्व्याप्यत्वासिद्धः यथा धूमवान्वन्हे वाद्यो यथा ज
लन्हदो वन्हिमान् द्रव्यत्वात् तेनैतद्दोषरहितो हेतुः सद्धेतुः इत्यनुमानं व्याख्यानमुप
मितिकरणमुपमानं कीदृग्गवय इति प्रश्ने गोसदृशो गवय इति उत्तरे नेप य
क्या रागोसदृशं प्राणिनं पश्यति तदा पूर्वोक्तवा[illegible]र्थस्मरणानन्तरं अयं गवयपदवा
व्य इति शक्तिग्रहः सा उपमिति अथ शाब्दः शब्दः प्रमाणं प्रकृतवाक्यार्थगोचरय
यार्थज्ञानवानाप्तः पदज्ञानं करणं पदार्थोपस्थितिर्व्यापारः आकांक्षायोग्यता
सन्निधितात्पर्यज्ञानानि सहकारीणि फलं शाब्दबोधः स्वरूपयोग्यत्वे सति अजनिताना एम्

१८

पबोधकत्वमाकांक्षातेनघटःकर्मत्वमानयनंकृतिरित्यत्रनान्वयबोधः स्वरूप्यायो
ग्यत्वात् अयमेतिपुत्रोराज्ञः पुरुषोपसार्यतांइत्यत्रराज्ञः पुरुषइतिनान्वय
बोधः पुत्रेणजनितान्वयबोधकत्वात् बाधकप्रमाविरहोयोग्यता तेनवह्नि
नासिंचतीत्यत्रनान्वयबोधः अयोग्यत्वात् अव्यवधानेनान्वयप्रतियोग्युप
स्थितिरासत्तिः तेनागिरिर्भुक्तमग्निमान्देवदत्तेनेत्यत्रनान्वयबोधः तदर्थप्र
तीतीच्छयोच्चारितत्वंतात्पर्यंतेनभोजनप्रकरणेसैंधवमानयेत्युक्ते अश्वानय
नान्वयबोधोनभवतितस्याविनाशाद्देनान्वयबोधोनजन्यतेवृत्तिर्द्विविधाशक्ति
र्लक्षणाच शक्तिर्घटपदादिपदस्यघटादौ लक्षणायथा गंगायांघोषः प्रतिवसती
त्यत्रगंगापदार्थेप्रवाहेघोषवासान्वयानुपपत्यागंगापदस्यतीरेलक्षणाकल्प्य

× शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च ॥ वाक्यस्यशेषा ×
× द्विवृत्ते र्वदंतिसं निध्यतःसिद्धपदस्यवृद्धाः ॥ ×

15 तेन पावकत्वाउपस्थितेनतीरेघोषः प्रतिवसतीत्यन्वयबोधोभवति गौणीवृत्तिरपि
लक्षणैव यथा अग्निर्माणवको गौर्वाहिकः अत्र लक्षणया अग्न्यादिसादृश्यप्रती
यते एतत्पदंतच्चतुर्विधं योगिकं रूढं योगरूढं योगिकरूढं च आद्यं यथा पा
चकादिपदं योगार्थेन पाककर्तरिशक्तं द्वितीयं यथा विप्रादिपदं रूढपदं ब्राह्मणवाचकं तृ
तीयं पंकजादिपदं योगरूढं पंकजनिकर्तृत्वेन पद्मत्वेन च पद्मवाचकं चतुर्थं यथाउद्भि
त्पदं योगिकं तरुगुल्मादिवाचकं रूढं यागविशेषस्य लक्षणा द्विविधा जहत्स्वार्था
ज अजहत्स्वार्था च आद्या यथा गंगायां घोष इत्यादि द्वितीया सर्वे छत्रिणो यांतीत्या
दौ अत्र छत्रिणस्तदितरस्यापि गमनान्वयः अयथार्थबोधप्रक्रियादेवदत्तो
ग्रामं गच्छतीत्यत्र ग्रामकर्मकगमनजनकवर्तमानकृतिमानित्यन्वयबोधः ॥ राम

२९

तीपापा अर्थः कर्मत्वं धातोर्गमनं जनकत्वं संसर्गमर्यादालभ्यं लटो वर्त्तमा
नत्वं आख्यातस्य कृतिस्तत्संबंधः संसर्गमर्यादया लभ्यः पत्रकर्त्तरीति बो [redacted] धः रु
त्र्या पादादौ लक्षणा यथा अयो गच्छतीत्यत्र गमनजनकवर्त्तमानव्यापारवानत्र
र्थः दधिपश्यतीत्यत्र द्वितीयालोपस्थले दधिशब्द एवाजहत्स्वार्थलक्षणया प
दधिकर्मत्वं बोधयति एकवचनाद्युपस्थितमेकत्वादि सर्वत्र प्रथमादिपदोपस्था
पयति देवदत्ते न गम्यते ग्राम इत्यस्य देवदत्तवृत्तिकृतिजन्यगमनजन्यफलशाली ग्रा
म इत्यर्थः शालित्वं संसर्गः भावप्रत्यये तु देवदत्तेन सुप्यते इत्यस्य [redacted]
x द्वित्वं संसर्गा वत्त्वं लभ्यं ततीपायां कृतिजन्यत्वं संसर्गः गमनं धातोरर्थः जन्यत्वं संसर्गः कर्तृत्वं कर्मत्वं नेपदार्थः x
[redacted] देवदत्तवृत्तिकृतिजन्यस्वापवत्त्वमर्थः भावप्रत्ययस्य

x५ अत्रापि चशब्देन उत्पत्तिः समुच्चीयते ५x

लेफलाभावादात्मनेपदार्थो न भासते भविष्यत्वं लृटोर्थः तत्र विद्यमानप्रागभा
वप्रतियोग्युत्पत्तिकत्वं तेन गमिष्यतीत्यत्र विद्यमानप्रागभावप्रतियोग्युत्पत्ति
16 कगमनानुकूलकृतिमानित्यर्थः लुङोर्थो [redacted] नद्यतनत्वमपि लुङोर्थो (उत्पत्ति
मूलत्वं च भूतत्वमतीतत्वं तच्चोत्पत्तावन्वेति तथा च विद्यमानध्वंसप्रतियोग्युत्प
त्तिकत्वं लब्धं तेन घतनत्वं परोक्षत्वमतीतत्वं चार्थः तदन्वयः पूर्ववदूह्यतो
त लङो नद्यतनत्वमतीतत्वं चार्थो विधिर्लिङर्थः कृतिसाध्यत्वे सति बलवदनिष्टाजन ङ
कत्वेष्टसाधनत्वं स्वर्गकामो यजेतेत्यादौ कृतिसाध्यबलवदनिष्टाजनकेष्टसा
र धनयागकः स्वर्गकामः इत्यर्थः आशीर्लिङ्लोटोर्थो विच्छाविषयत्वं तेन घटमा त्रि
नयेत्यत्र घटकर्मकमदिच्छाविषयानयनानुकूलकृतिमांस्त्वमित्यन्वयः व्याप राम

ई

क्रियायाव्यापाक क्रियाया आपादनं लडोऽर्थः तात्पर्यविषयीन्क्रचिभूतत्वं क्वचिन्दवि
षयत्वं लङाबोध्यते यत्नः कर्त्तुरिच्छार्थः सन्नुनराख्यातस्याश्रयत्वेलक्षणासविषयका
र्थकप्रकृतिकाख्यातस्यलक्षणायाआश्रयत्वं घटं जानातीत्यादौ क्रुसत्वात् यडोऽर्थः
पौनःपुन्यंतत्वं च तत्तदानीतनप्रकृत्यर्थसजातीयक्रियां तु ध्वंसकालीनत्वेसति
वर्तमानादिवृत्तिविषयत्वं पापच्यते इत्यादौ नादृशकालीनत्वमेव यङ्प्रत्याप्य
ते आख्यातस्यचरमदलबाधितत्वान्नविशिष्टवाचकत्वं यङस्तदानीतनत्वं च स्थू
यप लकालमादायविकालीनत्वं कर्तृविन्कार्थः पूर्वत्वं च संनिहितक्रियापेक्षयावोध्यं त
त्पूर्वकालीनत्वं तत्प्रागभावकालवृत्तित्वं तदुत्पत्तिकालीनध्वंसप्रतियोगिका
न लवृत्तित्वं वा तेभुक्त्वाव्रजतीत्यत्र गमनप्रागभावावच्छिन्नकालवृत्तिभोजनकर्तृभि

नोव्रजतीत्यर्थः समानविभक्तिकत्वेनाभेदेन धर्मिवाचकत्वात् अव्ययत्वेन क्त्वाप्रविभ
क्तिलोपात् कालस्तात्पर्यवशात् व्यवहिताव्यवहितसाधारणो बोद्धव्यः तेन पूर्व
17 स्मिन्न् देशे गत्वा अस्मिन्न् देशे आगत इत्येतादृशप्रयोगसंगतिः इच्छावान् तुमुनो
र्थः भोक्तुं व्रजतीत्यत्र भोजनेच्छावान् व्रजतीत्यर्थः भोक्तुमिच्छतीत्यत्र कर्त्तरि लक्ष
णा भोजनकर्त्तारमात्मानमिच्छतीत्यर्थः सविशेषणे हि विध्यापात् विशेष
णे इच्छाविच्छान्वयः प्रकृतधात्वर्थकर्त्ता एतद्शानचोः धात्वर्थजन्यफलवा
न न्कर्मण्यात्तोऽर्थः शत्रादिना कर्त्तावाच्यः सविषयकार्यकप्रकृतीनां त्वाश्रये लक्ष का
णा एवं कर्त्तृकर्मकृतां तेन [redacted] नेन रूपेण कर्त्ता कर्म च वाच्यं भावकृतां एम
प तुल्युट्घञादिनां प्रयोगसाधुतामात्रं धात्वर्थातिरिक्तस्य भावकृतानुपस्थानात् १७

ननु नीलं घटमानयेत्यादौ द्वितीयाद्युपश्रवणात्कर्मद्यवबोधापत्तिः ननु विशेष्यकर्मत्व
मितिचेन्न तत्र विशेषणविभक्तिः साधुत्वाय अथवा विशेषणविभक्तेरभेदोर्थः
अत्रायं विशेषः द्वितीयपक्षे वाक्यसमासयोः पर्यायता न घटते वाक्ये नीलं घटमि
त्यादौ अभेदस्य पदार्थत्वेन प्रकारत्वात् नीलघटमित्यादौ कर्मधारये लक्षणापातः अस्त्री
कारेणाभेदस्यापदार्थत्वेन संसर्गत्वात् तथा च वाक्यसमासयोः पर्यायतानुरोधेन षष्ठी
समासे राजपुरुषइत्यादौ षष्ठ्यर्थसंबंधलक्षणा न घटते संसर्गस्य संसर्गमर्यादा
लभ्यत्वात् वस्तुतस्तु विरुद्धविभक्त्यनवरुद्धस्याभेदबोधकत्वमुत्पत्तेर्मुख्यार्थेरा
जाभेदस्य बाधेन राजपदस्य राजसंबंधिनि लक्षणा एवं बहुव्रीहौ चरमपदस्या
न्यपदार्थे लक्षणा तथा च कर्मधारयान्यसमासे सर्वत्र तत्तदर्थे लक्षणा एवं नञो

18

जनके २

र्थोभावः अघटोभूतलमित्यादौ घटभिन्नैलक्षणा नकलंजंभक्षयेदित्यादौ वलवद
निष्टैलक्षणा क्रियासंगतस्यैवकारकस्यासंतायोगव्यवच्छेदोर्थः यथानीलंसरोज
भवत्येव विशेषणासंगतस्यायोगव्यवच्छेदः यथाशंखः पांडरएवेति विशेष्यसंग
तस्यान्ययोगव्यवच्छेदः यथा पार्थएव धनुर्धरइत्यादौ एवंदिशासर्वत्रबोध्यं इति
जगदीशभट्टाचार्येण विरचितंतर्कामृतंसमाप्तं श्रीरामचंद्रायनमः संवत्

एम
१८